No. ४२९४

Title सिद्धान्त चन्द्रिका गूढार्थ विवरणं १माध्याय १म पादः

Author श्री रामकृष्ण भट्टः

Extent १६ Age ५

Subject मीमांसा

सिद्धान्तचन्द्रिकाशब्दार्थविवरणे प्रथमाध्याय प्रथ
मपादः

४२५४



सिद्धान्तचन्द्रिकाविवरण

पा०टी० १

जयश्रीराम॥ ॥ कृतानुध्यानो निधिं रामः प्रणम्य तदनुग्रहात्। सिद्धान्तचन्द्रिकागूढार्थव्याख्या क्रियते मया उद्देश्यतया इति। इदं ह्यायथ्याहे साध्येद्वयस्यागे
उद्देश्यतया देवताकर्म्मांगभूतातस्याएवदेवताधिकरणोविग्रहादिपंचकनिराकरणादिरर्थः। शास्त्रस्यप्रयोजनकथनार्थत्वेसंमतिमाह। यथाहुरिति। अस्य
मीमांसाशास्त्रस्यप्रतिपाद्यमानतयाधर्म्मत्वोविषयः। तदेवास्यप्रयोजनमितिवक्तुंशास्त्रादाविदंसूत्रकृतमितिश्लोकार्थः। मंदेति एतत्प्रयोजनकथन
मित्यर्थः। उक्तोश्वरत्वादिति शास्त्रेषुप्रभूषुप्रवृत्तिरूपस्यप्रयोजनस्योक्तत्वादित्यर्थः। अनाभ्यासादिति अस्यार्थमपिशास्त्रमित्यैव धर्म्मप्रयोज
नतयाश्रोतृप्रवर्त्तयितुंशास्त्रकारस्याहेतिशंकया नाभ्यासात्तदनुपपत्तिः। श्रोतृप्रवृत्त्यनुपपत्तिरित्यर्थः। अप्रमत्वेनेतिमहर्षेःपूर्वशास्त्रकारस्याप्रता
वधारणाद्धिश्वासहरसर्थः। वक्ष्यतीतिहीतिभाष्यकारइतिशेषः। तथेतिजैमिनिरपिवक्ष्यतीत्यर्थः। गुरुपर्वेतिपर्वणिएचवच्छेदाः। गुरूणांपर्वणिगुरुपर्व
णिगुरुपर्वणांक्रमोगुरुपर्वक्रमइतिविग्रहः। तत्प्रतिपादनेचहेतुस्थार्थत्वाप्रतिपादनरसर्थः। कथमितिद्वैतावुपयुक्तत्वादित्यर्थः। सामर्थ्यादितिअ स्तु २
र्थाचवोधद्वारकनुनिवर्तनसामर्थ्यादित्यर्थः। तच्छेषत्वादितिउपनयनस्याध्यापनांगत्वात्तच्छेषिणाध्यायेनेनतत्प्रयुक्तिरूवितान्अध्ययनस्यानुनद्
नंगत्वात्कथंतेनतत्प्रयुक्तिरित्यर्थः। विध्यर्थेतिगुरुमतेयथाहुरितिप्रणयमंतावहूर्म्माधर्म्मौजिज्ञास्यावितिकुलहृद्गृह्यः। अत्रावातज्ञानमिछनसार्थेनवि
हितमध्ययनंतेभ्यएवधार्याधीतेवेदरत्युसन्नस्यवेदान्नसानानुरयात् किमनेनेत्यनरतिपुनरस्याहृष्टीजिज्ञासाजायते। ततोव्याकरणनिरुक्तादिश्रवणो
पनतोनंतोर्थप्रतीतौज्ञातायामपिमायानवधारणात्संशयितोभवतिततोवाक्यार्थविशेषजिज्ञासाभवति। तदिदंजिज्ञासाद्वयमभिप्रेत्याथातोधर्म्मजिज्ञा एम० १

सेत्यर्थः। आत्मविद्यापारेयाजकत्वात्ः मात्मत्वादिति। इत्थमर्जेप स्वास्त्रणोयाजत्वे रक्षापयेत्वनिग न्हीयाहेति वचनादित्यर्थः यः शिष्यमिति यच्छब्दोपबंधा
हिधिशब्दोपन्नावात इत्यर्थः। विध्यन्तरोति उत्तरक्रतुविधिभिरपेक्षितमित्यर्थः। इत्यात्रेमादिष्विति: इत्थमर्जेयत्वात्रा त्रणोयाजत्वे इत्यादिघ्राण्युत्सोत्रान्निभुंजी
तेत्यादिवकारणेति कर्तृत्वनयोः अंगप्रधानयोरित्यर्थः तदृष्टार्थत्वेति। यदेवदृष्टार्थमध्ययनानन्तर्यमथशब्देनोपदिष्टं तदेवक्रियामात्रानन्तर्यस्यादृष्टा
र्थत्वात्र वेदग्रहणं वेदार्थनिर्णयहेतुरित्युक्तमित्यर्थः अतोध्ययनेति अध्ययनविधिश्च त्रयाणामेवोपनीतानामध्ययनं विचारं च विधत्तेतोनत्र्प्रवि
कार इति भावः प्रयोगेति अध्ययनविचारयोः शेषिशेषभूतयोः योगपद्यमिति भावः। तादर्थ्यमिति चतुर्थ्यात्तदर्थार्थत्वेति सूत्रे प्रकृतिविकृतिग्रहणाक
र्तव्यमितिस्मरणादित्यर्थः क्रत्वर्थमिति क्रत्वर्थपरा मध्यादि पुत्रवार्थस्यापापश्लोकश्रवणादेनुत्पमानं साधनानां सम्भवति। पुरुषार्थं धर्मो देहना
दिकृतोनुत्पमानतदाभासमिति: अप्रसिद्धेतः न ज्ञानं न चेष्टेति पणपित्यत्युक्तं अर्थ्यतीत्यभाष्यकारः असंदिग्ध इति समुद्दिष्टं जिज्ञासायां कारणं नैके क
मिति भावः। इत्यादिति। वस्तुतत्त्वमेव वचनव्यक्तिरभिमता स्वरूपवचनत्वमत्क्तो वाक्यभेदप्रसंगादिति भावः। नित्येति प्रमाणवचनव्यक्तावयेणहो
नित्यानुवाद इत्यर्थः। अनुपपन्नः प्रत्यभावात्। प्रतिज्ञेति चोदनैव प्रमाणं चोदनाच प्रमाणमेवेति प्रतिज्ञेत्यर्थः। पूर्वं चेति गुणदोषावधारणात्पूर्वमि
त्यर्थः। स्वरूपमिति। तस्य स्वहेतोरनुत्पादात्। अनाश्रितातिशयानां इन्द्रियादीनां स्वतन्त्र्यादिति। ज्ञानस्वभावानुबंधि अत्सर्गिकमेवस्यादित्यर्थः। केनापि
तु प्रमाणेन: गुणाभावेति गुणाभावनिमित्तत्वेनवेदस्याप्रामाण्यस्यादिति भावः। वेदे गुणाभावेपीति। शब्दं वाप्रमाणितत्वकारणगुणास्तदभावेपी

कं

टिप्प० सर्थः· एवं सिद्धे विज्ञानहेतूनां प्रामाण्योत्पादकत्वे वेदेऽपि तत्संभवात् सिद्धं प्रामाण्यमित्याह· तस्मादिति: वक्तृगुणेषु। कारुणिकत्वादिषु हेतुत्वात् दोषज्ञानस्या
विसंवादविषयः पर्यवसानीतिभावः· अवान्तरव्यापारः प्रणयनाख्यः। बाधोऽहितीयं ज्ञानं। नन्वेवं सति बाधकस्यापि बाधकान्तरदर्शनात्परिनिष्ठेस
१ त्यत्राह· एवमिति। एकमिति। एवं त्रिचतुरैरेव ज्ञानैः दोषाभावसिद्धेर्नततोऽधिकामतिः प्रार्थनीया प्रामाण्यसिद्धौ येनानवस्था स्यात् यावदेव स्वत
नीयं चतुर्थं वा· ज्ञानमुत्पन्नं तावदेवैकं पूर्वमन्यद्वा निरपेक्षावादं स्वतः प्रामाण्यं प्रतिपद्यत इत्यर्थः· कुत्र न हि गुणानामुपयोगस्तत्राह· तस्मादिति। अ
२ प्रामाण्यहूयेति। अतो प्रामाण्यस्य टाकारणाहूय तदसत्ताहूत्सर्गतः प्रामाण्यमनयोदिताऽपि इत्यर्थः· संवादासंभवात् अलौकिकार्थप्रमापकत्वेनेत्य
र्थः· तस्मादृढमिति। यस्मादृते सर्वोदाये ह्यस्मिन्प्रामाण्ये दोषास्तस्माद्धि मुख्यसंवादग्रहणादुत्पन्नं दृढं असंदिग्धं अनेन संशयस्य व्युदासः उत्पन्नमिति अनु
त्पन्ने नवि संवादमच्छतीति विपर्ययस्य विज्ञानमिति विशिष्टं ज्ञानं अधिकार्थविषयं। तेन स्मृतेर्व्युदासः तत्स्मा पूर्वज्ञानादनधिकार्थविषयत्वादित्यर्थः।
आर्हतः क्षपणकः सिद्धान्तपरिपन्थित्वेनेतिः एतादृशः पुनर्बोधः धर्माधर्मावपरोक्षमीक्षेतेतत्स्मोदनैवेति प्रतिज्ञाहानिः स्यादित्यर्थः· अनयेति ज्ञप
णकसर्वज्ञनिराकरणन्यायेनेत्यर्थः· कारणैरिति। दोषदुष्टबाधयुक्तं यद्ज्ञानकारणं ततोऽन्यकारणजन्यत्वात्· प्रत्येकं लिंगादिभिर्बुद्धिर्दृढसंबं
ध्यते· धार्मिके तिलौकिकानां प्रयोगदर्शनादित्यर्थः· तद्योगादिति। गंगास्नानादिना पुण्यं भवतीति लोकप्रसिद्ध्या क्रियातिरिक्ते पूर्वेऽपि प्रयोगादुभय
गपिवाक्यं   तन्न। तत्रापि पुरुषस्यावान्तरव्यापारत्वेन स्वर्गादेरेव फलत्वात् अत्र यथा स्वर्गादेः स्नानादिसाध्यत्वं स्यादिति उक्तं चेति काशिकाटीकायामिस टिप्प०

१

र्थः॥ सामेति॥ अत एव सामग्री योगीति मात्रवचनं सर्थः॥ अवांतरेतिप्रायेणाकरणावांतरव्यापारस्य करणेषु सत्त्वे वोपलंभः॥ तदभावे तदनुपलंभात्॥ अतो
पूर्वस्यावांतरव्यापारत्वं चिरसं। आहृत्तेति॥ अनुपलक्ष्य॥ किमाद्येति। किं केन कथमिसनेना समन्वये क्षिप्ते॥ साध्यादिनि॥ परिपूर्णा॥ प्रत्यय॥ प्रवृत्ति पर्य
न्ते विधौ समर्थ इति तावत्स्यैव प्रवर्तकत्वमिति प्रत्ययमात्रस्येत्यर्थः॥ नान्दृशादिति। विधिस्वरूपविषयकेतिबेधाम्नेवानर्थं त्वं विज्ञापतरस्यर्थः॥ अधिकार्य
न्तरेतिप्रत्ययायपरिहारकम॥ शतयातनादिपरिहारकामो वेत्यर्थः॥ प्रत्ययाय हेतुत्वाभावे कुतो न क्रियत इत्याह अकरणमिति अधिकारिणा मेमनी
निमस्तत्राग्रतानुएवाधिकारीत्यर्थः॥ अत्रेतिहिंसाहिंसेत्यादिभाष्ये। न कर्तु कूपादिकर्तु॥ असिद्धस्येति जलाभावादनुपकारकत्वमित्यर्थः॥ अ
व्यवहितेति। विक्लिन्नरूपफलाव्यवधानस्य पचतीतिप्रयोगदर्शनादिति भावः॥ तात्पर्यमात्रेणेति॥ मरणोद्देश्यकपदप्रक्षेपमात्रेणेत्यर्थः॥ तत्र अ
काम कृते। केचित्तु॥ कुसुमांजलौ उदयनाचार्या॥ विधिव्यापार उपायो येयभावं प्रतिपादनरूप॥ हितसिनुमिच्छेदिति। एतद्वाच्य उपायमात्रत्न
येव विधानप्रतिपादनपरं॥ प्रवर्तनैकेति॥ विधिशब्दो हि प्रवर्तनैकरसं विधात्मानमभिधत्ते तदन्यथानुपपत्त्यैव तत्र संकल्पयतीति। नियोगेति॥
नियोगविषयत्वाद्वगमात्रचोदनालक्षणार्थ इत्यर्थः॥ हृदये स्थितं। भाष्यकारस्येति शेषः॥ उदीरितं भाष्यकारेणेति शेषः॥ अस्मिन्नव्याख्याने को
र्थ इत्यादि भाष्यमेवं व्याख्येयमित्याह॥ एवं चेति॥ फलस्य चोदनाफलस्य विधिसंस्पर्शः॥ तस्य लिप्सेति लिप्साप्रवृत्ति॥ अर्थः॥ प्रयोजनं। ततश्चफले
यापुनुषस्यप्रवृत्ति॥ साप्रयोजनलक्षणा न वेधीत्यर्थः॥ शानुनुपन्निमिति। अनिष्वरन्निति शानच प्रत्ययस्य लक्षणे हेतो॥ क्रियाया इति पुरुष

टिप्प०
२
लक्षणार्थत्वयो हि हिंसितुमिच्छेदितिवदन्नेषामुपदेश इति वदन् । श्येनादिफलानां शास्त्राविधेयत्वकरणांशस्य च विधेयत्वं भाष्यकार ॥ स्फुटीकरोति अ
मथा ह्युपदेशवचनमेवनावकल्पत इति हिंसितुमिच्छेदित्यभिचार प्रवृत्तपुरुषानुवाद इत्यनेन ग्रोपपुनुसन्निं दर्शयति लक्षणांच यदुक्तं यदुक्तसिद्धव
दयगम्यते न विधेयतया अतो लक्षणत्वान्न तावद्धिंसा विधीयते श्येनादीनामुपदेश इति श्येनशब्दमेव श्येनादीनां विधानमुक्तं । तीर्थमध्यागतेति । पूर्वापरी
3 भूते हि यज्ञे तार्तीयसवनिकानवपवमानकाले सर्वस्वद क्षिणापरिहृत्तो विपद्यते दीक्षितो विचिकेत्स्य प्रविष्टे चात्रौ हिंसामत्र तीर्थे भव इति च तीर्थंव हि क्षि ४
भूतायाएवनिषेधो न तीर्थमध्यागतायाः इत्यर्थ ॥ पदद्धोमवदिति । एतच्चाग्निशिरोवदित्यस्योपलक्षणं । नारस्त्र्यस्थिसत्त्वे हमिसादे ॥ पुनश्च शीर्षेमु
पदधातीत्यनेन विशेषणात्वेनाबाध ॥ काशिकायां नु शतशीर्षमुपदधातीति विशेषवचनमुदाहृतं तत्रथाभावस्य प्रसवाय जनकत्वमित्यर्थ ॥ अभि
क्रमविरेको बधं । इत्यादीति । करोतियो यद्यभ्रंतेप्यसोतरश्यकर्मबीजं वपति मनुष्यस्तस्यानुरूपाणि फलानि भुंक्त इति श्लोकशेष ॥ तत्कर्तृ ॥ हिंसा
कर्तृ ॥ सांख्यमतमनुवदति । अत्रेति । तदनुसारेण शास्त्रानुसारेणेत्यर्थ ॥ दृष्टार्थ एव । संस्कार इति शेष ॥ लोक इति लोकप्रसिद्धेरेव शास्त्रार्थावधा
रणोमलमित्यभिप्राय ॥ धर्मत्वमिति । प्रसिद्धिकथने नैवात्र निर्द्धारणमुक्तं तस्मादावर्तते इति आवृत्तो सकलमेव द्वि ॥ पठितमपि सूत्रं । तत्रैकस्य
स चोदनालक्षणोधर्म इत्यत्रतासर्वत्रान्यस्यार्थो धर्म इत्यत्र अस्य परत्वेवाभ्यतनसंबंधोनुवाद ॥ त्रयाणामपि तत्र सद्व्यपदांतांतंत्रेणोभयसंबंधे
नवाक्यभेद ॥ सकृदुच्चारितस्य सकृदुक्तस्येव च योग्यतयोभयसंबंधे शक्तिभेदाभावात् तदकेयपरितनं धर्मपदं वाउभासांसं वध्नते चोदनालक्षणो धर्म ॥ एम०
२

अर्थो धर्म्म इति च। मध्यपदवाच्यार्थघंताभ्यां। अर्थो धर्म्मः स चोदनालक्षण इति। आद्यमेव चोदनारामां चोदनालक्षणोऽर्थः स एव धर्म्म इति श्रुतेनवादेनालक्षण
वयवेन अनुमितेन च धर्म्मपदेनैकं निर्णयते। अर्थो धर्म्म इत्यपरं एवं हेतु सूत्रे इत्यर्थः। नार्थे नियता चोदनालक्षणानुवादेन धर्म्मविधानं तदा चोदनालक्षण
त्वस्यार्थत्वव्यभिचाराद्युक्तमेव विशेषणं अश्रुतत्वेऽपि वचनव्यक्तिः न सूत्रकारानभिप्रेतत्वात्। सत्सूत्रेण प्रसज्ञादिनिराकरणात्। यो धर्म्मः स चोद सा
नालक्षण इत्येवं वचनव्यक्तिः सूत्रकारस्याभिमता लक्ष्यते यो धर्म्मः स चोदनालक्षण इत्यस्याः प्रतिज्ञायाः अमलक्षणत्वनिराकरणे संगच्छते॥
नामव्याप्तस्मादेषैवात्र वचनव्यक्तिर्मुख्याभिप्रेता च अस्यां वाधिविशेषणमनर्थकमित्यर्थः। तदनावेऽर्थपदभारे। वाक्यभेदे इत्यधर्म्मोऽर्थोऽत्रे
तिपदार्थद्वयविधौ वाक्यभेद इत्यर्थः। अनुवादेतिनिसानुवादभूतोऽर्थशब्द इत्यर्थः। विशेषेति वचनव्यक्तिविशेषस्य च नार्थः। यपेनादीनां याग
नां। व्यापारा इति प्रयोगशब्दो व्यापारवचनः। प्रमाणमितिर् इति प्रमाणविकल्पः पंचधा दर्शितः। अनुमितेति। देशांतरप्राप्त्या सूर्यस्य गतिमनुमा अ
पगतिसाधनं लिंगमनुमीयते। पारंपर्येणेति। तत्रापि यावदिति साधनयोः प्रत्यक्षेण संबंधो नावगम्यते तावदनुमानाप्रवृत्तिरित्यर्थः। तस्यैवेति विशे
षविषयस्येत्यर्थः। हृष्यामिति। अस्मिन् पक्षे नोदने वैश्वधारणान सिध्यतीति भावः। न समर्थ इति व्यभिचारादिति भावः। विवयते इति। सविकल्पके
तदतिरिक्तस्यज्ञातादेरधिकस्यापि भासनादित्यर्थः। बाधकप्रत्ययस इत्यावशंकते स्यादेतदिति। षणामपीति। गुणकर्म्मसामान्यविशेषाणां द्रव्ये
ण सह समवायसंबंधः परस्परं चैकार्थसमवायलक्षणः संबंधः स सर्वोपि समवायं विना न प्राप्नोतीत्यर्थः। तदभ्युपगमात्रासमवादासाइत्यहा

दितिभावः। अव्यतिरेकपक्षे दूषणमाह अथेति। तदभावः इतरेतराभावः नहुह्रीति गौरिति हि शब्दो गौरित्यर्थो गौरितिज्ञानमित्यर्थः॥ ॥ अथ सन्निकर्षः॥
पुरुषप्रयत्नगमनादिव्यापारपरम्परया हृदाह्लादिप्रत्यक्षतामित्यनादरेण षष्ठी। अनेनेति। तत्प्रमाणमित्यनेनेत्यर्थः। तत्र प्रागादौ अथ सचेतिपुरुषप्रवर्तन इत्यर्थः ते
फलं हानोपादानादि ज्ञानादीत्यादिपादानुग्रहरूपज्ञानं। कारकाणामिति। शब्दस्यापि प्रवृत्तिकारकत्वादिति भावः। कार्याचेयस्य अर्थप्रतीत्या एव
कार्यान्वयस्येत्यर्थः। अभिधामात्रस्येति घटादिशब्दाभिधायार्थस्येत्यर्थः। अभिधेयेति। अत्र लिङ्गादिशब्दत्वोपाराभिधातिरिक्तं तत्तीयमभिधे
यं किमस्तीति विकल्पः। तत्रत्ययेति। अर्थापत्त्याप्रदर्शितत्वं। अतो न वर्तनापदेशे प्रवृत्तिसत्वेपि तत्र यत्नमिति भावः। मूलात्मेति एतत्त्वलिङ्गादिव्या
पारस्यानुपपन्नत्वमेवेत्यत्रानन्तहिशेषणेनेति। संप्रयोगविशेषणार्थः। अतो नागतादिसंप्रयोगजं यो निप्रसङ्ग इति राहुलं। प्रमत्तस्य द्वयमर्थो
प्रमुष्टतत्त्वांशः। अतोऽग्रहणेति। स्वर्गं जनत मित्यत्र। पारलौकेति। कर्मणो दर्शपूर्णमासकारीर्यादिभ्यः परलोकेहलोकभवस्वर्गवृष्ट्यादिफलसं
संबंधो वा स्थार्थोऽस्य एवमर्थं द्वादशलक्षणीप्रमेयं यथारूपार्थीविज्ञानं सिध्यतीत्यर्थः। धर्मार्थिभिः मीमांसकैः। लोकसम्मतेः प्रत्यक्षादिभिः अ
र्थस्येति। पूर्वपक्षविमुह्यार्दिवृद्धिः सिद्धान्तनानैवेदिति पूर्वोत्तरपक्षविभागेनार्थस्यासदसत्त्वयोर्यत्नः कार्य इत्यर्थः। क्रियां प्रतीति क्रियाभिधार्थः
क्रियाशब्दस्यात्रानुष्ठानवाची। अभिन्नस्य। चिन्मात्रस्य। निर्वस्तुके जगति। अंशेस्वप्नप्रत्ययांशे प्रतिषेधो निरालंबनत्वसाध्यरूपः। देचसालंकल्प
पितेसनुषंगः। पूर्वप्रत्ययः निर्विकल्पकरूपः ज्ञानेवेति। अर्थाभावेपि भ्रान्तिरजताद्यैरजतज्ञानं साकारमुपलभ्यते ननु विज्ञानाभावे साकारोऽर्थः

अतो ज्ञानस्यैवाकारो धर्मो नार्थस्येति भावः। निरालंबनताऽत्र अर्थेन रूपा। ज्ञानातिरिक्ता। अत एव साधनोक्तिविज्ञायाः चैत्रादिप्रत्ययेति। चैत्रोयमिति ज्ञानाति
रिक्तार्थविषयः प्रत्ययः ग्राह्येति। केवलग्राह्यत्वाभ्युपगमेऽर्थ एवासौ ज्ञानग्राह्येणोक्तः स्यादित्यर्थः। अथवास्मिन्पक्षे दोषद्वयमाह अकालइति। ग्राह्य
कस्वभावं पूर्वविज्ञानं उत्तरोत्पत्तेः प्रागगृहीतं स्वविषयां वासनां नोत्पादयति वासनायोगगृहीतविषयत्वनियमात्। तदभावे च नोत्तरः पूर्वविषयत्वेनोत्प
द्येतेत्यर्थः। यथानागतानुज्ञानानुसंतानान्तरज्ञाह्यानश्शून्यपरा एवमतीतादपि हठत्वेनाविज्ञातानुत्पन्नमात्रविनष्टादपीति दृष्टान्तार्थः। ग्राहका
कारमात्रत्वे चोपरितनं प्रतिग्राह्यतानत्यादित्याह केवलेति। दूषणान्तरमाह किमपेक्ष्येति। सर्वेषां ग्राहकत्वे सति ग्राह्याभावेन ग्राहकतापि न स्या
दित्यर्थः। आकारतापि नैतद्विद्धत्वयैकं ही साद्विनानिरस्तैवेत्याह आकारतेति। ननु तस्यानंतरातीतमपेक्ष्य ग्राहकत्वं ग्राह्यत्वं गोन्तरमपे
क्ष्येति किं नोपपद्यते। नाउक्तोत्तरत्वात्। एवं स्वोत्पत्तिवेलायामगृहीतं न पश्चिमर्थ्यपेशअसमसमैनु ज्ञानं स्वविषयां वासनां जनयति किं त्वर्थ
विषया अत एवार्थविषयैव स्मृतिरस्य यावज्जन्यते न ज्ञानविषयात्तस्मादुत्पत्तिवेलायामारीसंवित्तिरभ्युपगंतव्या तस्य अस्वयमेव ग्राह्यत्वग्राहकत्वं स्ते
स्ता चापतंतत्त्वनिरस्तमिति। स्वयंप्रकाशत्वेनु अतीतस्य स्वग्रहणायोत्तरापेक्षा न स्यादित्याह संवेद्येतेति। एवं च ग्राहकरूपत्वमाकारत्वं वानुपपन्नं इति ग्रा
ह्यमात्ररूपं पूर्वं ततश्चार्थ एव शब्दान्तरेणोक्तो भवतीति स्थितं। इदानीं परमपि ज्ञानं त्रेधा विकल्प्य आकारत्वेनाव दूषणमाह आकारेति। परस्य ज्ञा
नस्य आकारकल्पनायां तव मते स्वात्मांश एव प्रमा पर्यवसाने ससतीतस्येत द्विषयत्वं न स्यात् स्वयंप्रकाशत्वेनातीतस्य ग्राह्यस्यांपेक्षाभावादिति भा

रिप.
वः केवलग्राह्याकारत्वे दूषणमाह पूर्वेति। यथापूर्वज्ञानग्राह्यरूपं तथेदमपि ग्राह्यरूपमतः पूर्वप्रतिग्राहकत्वं न स्यादित्यर्थः। ग्राहकाकारमात्रत्वे
५ दूषणमाह ग्राहकेति ग्राहकाकारमात्रत्वे तु ज्ञानस्य पूर्वज्ञानं तस्य विषयो न स्यात्। केवलग्राह्यत्वाकारेणादेतूप्यारसारूप्यनिबंधनत्वाद्धि विषय। घ
स्येत्यर्थः। किञ्च वासनाद्वारेण पूर्वज्ञानपुरस्सरमिमं जनयेत् तत्क्षणिकस्य वासनो सम्बन्धो व्यापारो स्तीत्याह। न चेति। मीमांसकपक्षेन स्थायित्वाद्धि
5 ज्ञानस्यात्मगतसंस्काररूपवासनाजनकत्वं युक्तमित्यर्थः। ज्ञानस्य तु क्षणिकत्वेन वास्यवासकत्वभावो नास्तीत्युक्तमित्याह शक्त्यर्पणस्येति।
प्रत्यक्षेति। प्रत्यक्षाव्यभिचारित्वादित्यस्यायमर्थः प्रत्यक्षप्रमाणाव्यभिचारेण वानुमानस्याव्यभिचारः स्यात् स्वकीयलक्षणाव्यभिचारेण वानुमा
सा नस्याव्यभिचारः स्यात् व्यभिचारेण वा। नाद्यः प्रत्यक्षाव्यभिचारित्वात्। नापि द्वितीय एवंलक्षणकत्वादिति। अयमदोषः। अन्येति सलक्षण
इत्यर्थः। केनचिदिति समासस्थेन केनचित्सदेनेत्यर्थः। एकदेशेति ज्ञातसंबंधस्यैकदेशदर्शनादित्युक्तत्वादित्यर्थः। एकदेशस्येति। एक
देशस्येति कर्मणि षष्ठी क्रियया व्याप्यमानं च कर्म भवति। अतः शब्दतो विप्राधान्यमेकदेशस्यावगम्यत इति भावः विशेषणमिति अतो प्रधा
नत्वेन न सापेक्षस्य समास इत्यर्थः। अन्यपरेणेति। दर्शनपरेणैकदेशोपादानेनेत्यर्थः। तदभावे पी मितरात्स्यावभावे वि। शिरः। पान्वेत ह क्षामु
मानेना ताप्यसंबंधः समः कृतकत्वादिः स्यनो धूमवत्त्वादिः। अधर्मत्वं गमयेत् अग्नीषोमीयादावित्यर्थः। काश्मोदितिजस्तुहसादौ हिंसा
त्वनिषिद्धत्वे उपलभ्येते। तत्रानिषिद्धत्वमेवाक्षेपकधर्मत्वं स्यान हिंसात्वं यतो निषेधविधिविषयुक्तैवानिष्टानुबंधितानहिंसात्वप्रयुक्ता अतो निषिद्ध एम.
५

त्वे सत्येव धर्मित्वम् अविनुं शक्तिन्ने हिंसात्वे सतीत्यर्थः । अस्य इति हिंसात्वादस्य उपरेणामिति हेतुत्वेन प्रयुक्तं शब्दविमुखत्वीवत्त्रि । अतएते दृष्टेष्टे रपि व्यापक
म धर्मित्वं निर्धारयितुं शक्यमित्यर्थः । भूयो दर्शनेनेति सर्वस्तैकेन दर्शनेन गम्यते बहुभिश्च दर्शनैर्वेद्रष्टुरस्याग्निना साहित्यं गम्यते । तस्मिंश्चा
वगते अभिचारे चानवगते यथा हृष्टेषु देशेषु धूमस्याग्निना व्याप्तित्वगता भवति । न त्वस्यैव सूक्ष्मस्य महानसेग्निसाहित्यमवगतं देशान्तरे
चासमाप्यासेनात् । कस्यचिकेनसाहित्यं स्यात् तत्राह व्याहृत्याह यामात्येति । उभयपेटपरित्यागेन सूक्ष्मत्वस्याग्नित्वेन पुनः पुनर्दर्शनमस्तीत्यर्थः । कचित्त्वस्या
यिनोरपि कृत्रिकारोहिण्योर्भूयोदर्शनमस्तीत्याह क्वचिदिति । ननु भूयोभिरपीत्यादि न्यायरत्नमालाग्रंथः । अत्र चेत्यादि न्यायरत्नमालाग्रंथः
उक्तमाचार्येणेति शेषः । तथाक्रियद्भिरित्यादिरपि न्यायमालाग्रंथः । आहेत्यादिरपि न्यायरत्नमालाग्रंथः । एतदिति देशविशिष्टस्याग्नेः
पक्षतानसंभवतीत्यर्थः । अपृष्टेति । योग्निः सोस्ति कचिद्देशे योदृष्टोपन्नतत्रवा । अग्निः पूर्वानुभूतो वा देशमात्रेण संगतत्वस्यादिना हुंथेनास्था
विकल्प्येत्यर्थः । धर्मविशिष्टस्येति अग्निमान पर्वत इति न पुनरयमग्निरेतद्देशवानित्यर्थः । धर्मिणा इति मत्वर्थश्च मत्वर्थेन आग्न इति तयोरेव ग
म्यगमकभावो नाग्निधूमयोरित्यर्थः । न च तस्येति । विशेषणभूतस्यैव ह्यः विशेष्यः पर्वतः । अग्यात्यताविति । शब्देन प्रतीयत इति प्रतिज्ञायां
प्रसक्तविरोध इत्यर्थः । अश्रावणत्वादीति । अश्रावणः शब्द इति प्रतिज्ञायामनुमानविरोधः । ननु प्रसक्तविरोध एवायं शब्दस्य श्रावणत्वान् । मैवं । श्रा
वणत्वं नाम श्रोत्रग्राह्यत्वं स च शब्दधर्मो न प्रत्यक्षेण वसीयते वधिरादिगतान्वयव्यतिरेकलिंगावगम्यत्वात् । अतो नुमानविरोध एवेति । रूपत्रयं पक्ष

टिप्प॰ ६

6

धर्मत्वादित्रय इति। एतेवक्ष्यमाणास्त्रयः संशयहेतवः तानेवाह सत्साधारणेति अनेनासपक्षवृत्तितोक्ता। तदभावेवेसनेनविपक्ष इति। एवंचसाधार
णसंज्ञ एकोभेद इति उक्तः· द्वाभ्यांव्यावृत्त एववेसप्साधारणसंज्ञकोपरः द्वौविनुहृत्येसनेनविनुहृत्याव्यभिचारिविपक्षगाम्यतीयः निश्चयैकांगोति। सप
क्षाद्द्वयोविपक्षव्यतिरेकश्चेति द्वयंनिश्चयांगं तत्रसाधारणोविपक्षव्यतिरेकांगहीनस्तत्रापिहृत्तेः अतः संशयहेतुः असाधारणस्तु वि
पक्षव्यतिरेकेसत्यपिपत्राभ्रपविकलइतिनिश्चयैकांगवैकल्यात्सोपिसंशयहेतुरित्यर्थः· प्रयोगश्च असाधारणः संशयहेतुः निश्चयैकांग
वैकल्यात्साधारणवदिति। विरुद्धाव्यभिचारिणंलक्षयति। यत्रेतिवायुरप्रसन्नः इत्यत्रेसरूपत्वात् प्रसक्षमहत्वेसतिस्पर्शवत्वात् लक्ष
णंत्वनंतरोक्तमेवेति। किमर्थं। किंप्रयोजनकमित्यर्थः· धर्मिस्वरूपबाधेनेसादिवार्त्तिकंटीकांतरस्थं एतद्दीकायामभावाद्मस्तुतरहूप्रस्पयहे
तुत्वादिव्यापिनोतयोर्दूषणत्वोपपादनाद्दतद्विपरीतमितियेनसहव्याप्तिर्गृहीतातद्विपरीतमित्यर्थः· हेत्वाभासत्वेनेतिनायंहेत्वाभासः साध्यसा
धकत्वात् अतस्तत्वेनोद्भावनंनिग्रहस्थानमापादकमितिभावः· साधारणइति साधारणानैकांतिकेअसाधारणानैकांतिकेचेत्यर्थः· यत्रापीतिनित्य
ः शब्दोमूर्तत्वात्‌यदनित्यंतन्मूर्तमितिसम्यक्‌प्रयुक्तेपिवैधर्म्येयदार्थस्तदानास्ति साध्यहेतूभयव्यावृत्तिश्चन तयातद्वैधर्म्याभासत्वेत्यर्थः· तथाहि
सः शब्दोमूर्तत्वाज्ज्ञानवदितिदृष्टेविसपक्षात्ययेःपदनित्यंतन्मूर्तंयथापरमाणुरितिसाध्याभावविकलोवैधर्म्यदृष्टांताभासः· बुद्धिवदितिसाध
नाभावविकलः· आकाशवदित्युभयाभावविकलइति। गतीति। गतिस्मरणमित्यनेनकर्म्मणोनिसानमेपरितंतिरात्र इतिपंक्तिनरभिप्रायः। प्रत्यये

रामं० ६

ति। अथ यावत्प्रसक्तो वर्त्तमानावगाहीप्रत्ययः। निराकर्तुमिति। एतत्क्षमानान्तरेण निराकरणां वहिरंगत्वादिति। अत्र व्याप्तिग्रहणात् हिरंगत्वमित्यर्थः। यदेकार्थे
३॥ ति अनेन कर्म्मणोन्तरंगत्वमुक्तं। नियमेनेति। अनेन वाव्यभिचारित्वमुक्तं· प्रथमत्वात्समस्तत्वाहुहिरंगः हस्तपादादौ वप्रथमत्वव दात्मनासंयुक्तेरि
किंचिद्देवदेवांतरं प्राप्नोतीति अपि चात्मनो। आकृतोरेवेति नात्र विशेषयोर्गोप्यगमकभावः संबंधग्रहणकालावगतयोर्हि नष्टत्वात् अकृत्स्ना
रेवगो मध्ये धनादिनाकेन चिद्रवच्छेदेनावच्छिन्नयोर्गोप्यगमकभाव इत्यर्थः। विशेषमत इति। ससंभ्रमो दाहरणे तू नयमपि संभवति। आदिसोदा
हरणे तु न कदाचिदपि प्रसक्तस्य ... संभवति सर्हैदेवादिष्वेगोनेद्देषांतरप्राप्त्यनुमेयात्वादित्यर्थः। अनुमानेकेति णाक्यमतं। नेवान्यानृति।
अत्रैभवंमसं। कस्यान्ने परिमाणस्य। नस्य हि ह्रस्वत्वं नोपापिमां उत्संपरमहत्त्वच। तत्रासंतास्सत्वैवर्त्तमानः परमाणः उः अससमहत्स्ववृत्रमानओमा
द्धिकमसमिसत्य तरिति: ननु प्रसक्तेति। यथा सत्त्रकारेण समसंप्रयोग सूत्रे प्रत्यक्षमात्रस्यैव लक्षणं कृतं न तु हि परोक्षस्य वाक्जस्य सर्थः। नेवा
मितिप्रयुक्तिनिस्त्रापराहेतुप्रवृत्तिनिवृत्तिप्रतिपादकागत्वादित्यर्थः। अनेनैवेति विशेषलक्ष[redacted]णेनैषसिद्धत्वा
न पृथगुक्तमित्यर्थः। नदैवेति। पदपदार्थयोर्ह्योकवेद्योरैक्यादिति भावः। विषयभेदेनेति सामान्यमात्रं पदस्य विषयः। प्रसिद्धधर्म्मविशिष्टस्य
धर्म्मी लिंगस्य विषयः। त्रैलक्षण्यं लिंगसामग्री। एहुस्य चावधारणमात्रं न च शब्दस्य पक्षधर्म्मत्वादिकं संभवति क्रियाकारकसंबंधानाना
द्रप्रयोगश्च तस्मादननुमानत्वशंकेह प्रसक्तस्य वह्नवेतु· त्रैनष्परहितत्वेनताहाग्विपर्यव र्जनादिति न विशिष्यत इति। स्मरणात्तस्मनन्तुस्मरणमेवेति

भाव॥ स्मरणस्येतिकर्म्मणि षष्ठीकश्चिदितिलौकिक॥ कआदेशस्तथाप्रयोगात्॥ अत्रेदमितिभाष्यकारीयलक्षणमाक्षिपति। केचित्त्विति। नैयायिकाएवके
चिदेवमाहुः॥ श्रुतातिदेशवाक्यार्थस्मृत्यनेगवयदर्शनात् अयंगोसदृशोगवयइतियज्ज्ञानंतदुपमानमित्यर्थः॥ अधिकार्थेति। अनधिगतंगवयस्वरूपंतस्य
यसादृश्यविशिष्टत्वमाधिक्यमितिभाव॥ अतिदेशेतिगोसादृश्येनोपलक्षितस्यपिण्डस्यगवयशब्द॥ संज्ञेति। अतिदेशवाक्यस्यार्थः॥ दृष्टेनुगोसदृशेश्रु
ते। तेनैववाक्येनस्मृतितोगवयसंज्ञाप्रतिपद्यतइतिनोपमानापेक्षेतिभाव॥ एवंतावल्लौकिकस्यागमत्वं। भाष्यकारोदाहृतस्यस्मृतित्वं। नैयायिको
क्तस्यगवयस्यस्मृतौनोपमानंप्रमाणान्तरमितिलक्षणाभावेनालक्षणमेतदितिप्राभाकरायावार्त्तिकभाष्योदाहृतमेवसमर्थयितुमारभते। अत्रोच्य
तइतिसमर्थ्यमानोवेतियरोक्षेत्यर्थः॥ भाष्यगतंचस्मरणपदंगोनष्टान्वेषणएवस्मरणमित्यभिप्रायंदृष्टव्यविशिष्टेतुप्रमेव। एवंचकर्म्मण्युत्सन्नस्म
रणायदंष्ट्रास्थेयं। तत्रअयथासादृश्यविशिष्टगवयदर्शनस्मर्यमाणस्यगोः॥ सादृश्यविशिष्टत्वेनप्रमापकमित्यर्थः॥ अतोग्निरिवेति। अत्रापे
गत्यादिर्दृष्टः॥ यस्तदन्तेस्यतत्रयस्तदन्तत्वादिरूपलक्षणान्तरंनज्ञातमित्यर्थः॥ अवयवीति। अवयविरूपोयोगुणस्तस्ययोवयवरूपागुणास्तत्सामा
न्ययोगइत्यर्थः॥ विचित्रमिति। वस्तुत्वसिद्धधर्म्ममेवविचित्रतांदर्शयतिएवंज्ञातीतिज्ञातिर्जन्मतेनसाहचर्यमग्निवद्ग्निगणयो॥ गुणसामान्यतुचित्रे
देवदत्तावयवानामभावात्। अवयवसामान्ययोगस्तुसादृश्यंपत्नसंभवतितथापिसंस्थानपरिमाणवर्णसामान्यानिसंत्यस्येवतावद्देवदत्तस्यचि
त्रेणसादृश्यं। द्रव्यसामान्यंसमानालंकारधारिणोर्गवादिधनवतोर्वा। नियतादानक्रियासामान्यश्येनयागयो॥ शक्तिसादृश्यंसिंहदेवदत्तयो॥

धर्म्मेण॰ सादृश्यपर्यायत्वेन गृहीतंसदृशीः प्रयाजादिलादेरिति। सादृश्यम् भूयोवयवसामान्ययोगाभिन्नेति। असदृशे यदि स्यात् अपर हितं सदृशपद॰ उपा
मानात् ज्ञायमानादियुतं प्रयाजादि· न हि सौर्यं न ह्याक्येयोराग्नेयं न ह्याकाण्याम वयोः पक्षे ज्ञेये नानुमानस्यापि अनुमानस्य संबंधवलादेव यमकत्वात् अतो
ग्न्यादियुताः॰ प्रयाजादय॰ सौर्येकर्म्मणि गानशक्यत्वेनालात् सौर्यं चरुं निर्वपेदाग्नेयवदित्युपमानेन तु लभ्यंते। आग्नेयवाक्यमग्न्यादियुतं पार्थमुपस्थापयति·
तत्र साध्यसाधनांशयोरनपेक्षितत्वात् तावन्नाहृत्य अंतिमांशोपयोगित्वेन उपमानं सौर्यभावनयागत्यंतरं इति प्रयोजनान्तरमाह। प्रतिनिधिरिति पाद सा
त्रयेण प्रयोजनांतरमाह प्रतिकृतिरिति पादत्रयेण· प्रतिकृतिरपि गोगोवाध्यते अर्थे॰ सदृशेरिसर्थ॰ तदेवाह। यहूोतिरेवत्सदृशे ज्ञातापि वु
द्धिर्मिथ्यापि भवति कारणान्तरमपि सदृशोपादाने दर्शयति मन्तिरपीतिन केवलं वद्धवयवलाभ॰ किंतु सदृशेणीव मेव वुध्युत्पत्ति॰ मदसदृशवो
धे सत्यपीति॥ ॥ इत्युपमानं॥ तयोः जीवनगृहाभावयोः॰ एतन्नेति। विषमानत्वेसत्योत्तरा हेतु· गोहादुत्कालितमन्ये त्रोविषनेवहिरेवहीनि। अन
न्तरं गेहाभावत्वमात्रं न्ययत्त्वतं न प्रतीयते। नतावत्ताहिर्भावश्चेत् तत्सेवावधार्यते। सिद्धे सद्भावविज्ञाने गेहाभावधियात्रत। गेहादुत्कालितासत्तावहिरेवाव
तिष्ठत इत्यस्योत्तरार्धमित्यर्थ॰ अन्यतरो वहिर्भावलक्षण॰। अर्थापत्त्येति साहित्यसिध्यर्थमेवार्थापत्ते॰ प्रमाणान्तरत्वं तद्दूशेन नु संवंधे गृही
तेयस्मा दूव त्वनुमानमित्यर्थ॰ संसष्टेति जीवनसंसृष्टगृहाभाववुद्धिर्वहिर्भावकल्पनानूपार्थापत्ते॰ कारणमित्यर्थ॰। विनुहेति। विनुदः साध्य
विपर्ययसाधक॰ प्रतिपक्षनूपो व्यतिवानीयस्यतथात्तस्यभावस्तत्त्वं। द्विवेति। एतावानेकोवाक्यार्थरतिभाव्यः स्यास्येतिसत्त्वाश्रुतिकल्पनेन

टिप्प० ८ कश्चित्संबंधोस्ति येनानुमानस्यात्। लिंगादिभिरपि अर्थकल्पने नानुमानसंबंधाभावात् सर्पविषसंबंधेतज्ज्ञानाभावात्। विश्वजिदादिषु फलादिकल्पने
पर्यायत्रित्वनानुमानंसंबंधज्ञानाभावात् अनुमा। यदिकरणेप्रमाणमनुमानस्यादितिप्रयोगात् भाष्यकारेणापि पश्चान्मानसामान्यादनुमानशब्दप्रयो
गात् कथमनुमानत्वे तत्राह एवमिति॥ ॥इत्यर्थापत्तिः॥ एकेति। श्रृंगस्य यदसत्त्वं शशशृङ्गावयवसत्त्वेन सोसं माभाव इत्यर्थः। स्वरूपेति। कंचित्स
४ देशं स्वरूपमात्रेणाह दृष्ट्वा पुनः कालांतरे मठे शांतिस्थानस्य आसीत्तत्र देवदत्तः समनेन पृष्टस्य प्रदेशं देवदत्तविषयं ह्युपादर्शनच स्मृत्वा नासीत्
तत्र देवदत्त इति ज्ञानमुत्पद्यमानं अनवगतविषयत्वेन प्रमाणं अतीताभावग्राहकत्वेन चानपेक्षत्वं स्यादित्यर्थः। वार्त्तिकमिति। एतच्च श्लोकवार्त्ति
कादिरिक्तं। कार्यं स्यादि। यत्र दधिरूपं प्रागभूत्वा भवति तदुपादेयं कार्यं। यत्तु प्रागवस्थितक्षीररूपं पश्चान्न भवति तदुपादानं कारणं तथा गोरश्वो
न भवति अश्वश्च गोर्नेभवतीत्यादि व्यवहारो न सिध्यतीत्यर्थः। अभावं चिनेति। अभावस्य प्रागभावादिरूपभेदे। सत्तीत्यर्थः। घटेति। प्राग
भावादिरूपेणाख्याहृतिः। अभावरूपेण चानुवृत्तिरिति। हेत्वंतरं प्रमेयत्वादिति। कर्म्माणीति। सर्वप्रकारेपि वस्तु संकरोभावप्रमाणाकएव त्वं
न हि दर्शादे यथा सादिचोदितीगातिरेके एगांगांतरभावे फलांतराभावे वा॥ प्रागभावएव प्रमाणांनास्मत्। एतत्प्रभव प्रागभावप्रभ
वमित्यर्थः नतिर्थ्यां अनिर्णीयकत्वात्॥ ॥इत्यभावः॥ अत्रत्य इति चित्रोक्तेपस्थ इत्यर्थः। निमित्ताभावेनेति चित्रादिरूपस्यनिमित्तस्या
भावादित्यर्थः। विधौ लिङ्नियदियायादिति विधिः अपेतेत्यर्थः। मंत्रेष्वेति। अदिर्निर्दिष्टाण्यादिष्वित्यर्थः। एतन्नूदिनेति। मं युक्तः समवायादेरभा

स

टिप्प० ८

वरस्यार्थः ॥ शब्दं शब्दजमं तानमित्यर्थः ॥ हृद्वेभ्य इति त्रेधा चावगतिर्हि हृद्भ्यो भवति। कवित्वादवस्थाच्छब्दादयमर्थो बोद्धव्य इति वृत्त्या ॥ कथयंति। क्वचिन्नायमस्य
वाचकोयं वा व्यवहरतीति कथयंति। क्वचिद् ज्ञातारिता छब्दान्नर्थक्रिया दृष्टा वाचकत्वमनुमानात्मकस्यपतीतिर्न्न ग्रहणकाय न्यास कृत्कार्यापेक्षा। लोके
वेदे वेति लोके वक्तरादौ प्रदीपाद्यपेक्षा। वेदे त्वाग्नेयादौ प्रयाजाद्यपेक्षेत्यर्थः ॥ ॥ इति संबंधाक्षेपः ॥ ॥ अभ्यांशं कर्तव्यं वर्णानिराकरणे इति। परि
हरति ॥ कार्याणीति। पदाश्रयाणि संबंधग्रहणादीनि कार्याणीत्यर्थः। एष इति वर्णात्मकसंबंधापधारणरूप इत्यर्थः। अश्रोत्रत्वादिति। मीमांसकानां
मिस्वानु। मयत्वादित्यर्थः। अविद्यमानमपीति। णत्वस्य गणत्वे जनन्यास्तत्र महत्त्वयोरसंभवः। गणो गणानंगीकारादिति भावः। शंकानकथ्यमिति व
या रिहरति अत्राहुरिति। अन्यदपीति। तत्याद्वेगेन धावसेनाव्यारूढाच्छतः पर्वतीदोन्विज्ञानं भ्रमणो भ्रमतश्च तान। मंदूकवसया क्षापवं ज्ञानु त्र
रागवृद्धिपिः। अक्षत्वत्वमहत्त्वाभ्यां सामान्यं चवनदाश्रयं। गृह्णंतीयहा दन्तानि निमिन्नग्रहणाद्धि नाव्यंजकस्य मवुध्येवं व्यंगोभ्रांतिर्भविष्यतीरसा
दिवाजीकेटीकाया चावगंतव्यामित्यर्थः। कथं तर्हि अवर्ण्यकुलमिति व्यवहारः। ब्राह्मणकुलमित्यादौ समानजातीयसमुदाये प्रयोगदर्शनात्
रा तत्राह अवर्णेति। द्वौ स्वादीनां स्थानसाम्यादित्यर्थः। ननु दीर्घादिरुच्चारणधर्मत्वादनित्यः। न कृत्स्नवर्णस्य वाचकत्वे वाचे स्वरूपमति नित्संस्था
नत्वानुपूर्व्यवादवत्तस्य परिहारो भविष्यति। अस्य थापीति। स्फोटांगीकारणापीत्यर्थः। गुणेति। उपादेयगतत्वे नसार्वर्षा विवक्षेति भावः। प
दवाक्ययोरिति। ध्वनिमात्रोपादानेपि वा दिध्वनीनां स्फोटाभिव्यंजकत्वस्य पारेरनिष्टत्वादं। प्रसिद्धसाध्यत्वं स्यान्न तन्मा भूदिति पदवाक्यायारि स्फो

टिप० पदंवाभयोर्वर्णमात्रावर्णाः ध्वनयोवा नव्यंजंतीत्यन्वयः। अत्र स्फोटंनाभिव्यंजयंतीति साध्योधर्मः व्यंजकत्वादिति हेतुः प्रदीपवदितिदृष्टांतः तस्यापेव
६ प्रतिसायांसत्वादिति हेतुः घटवदितिदृष्टांतः लौकि। कति। नचप्रसक्षविरोधः प्रसक्षादिभिरप्रतीयमानत्वादित्यर्थः। वर्णेभ्य इति वर्णेभ्य इति रिक्तत्वादि
९ तिहेतुर्घटवदितिदृष्टांतः। नचदृष्टविरोधः स्फोटस्यासिद्धत्वेनवाचकत्वादृष्टेरिसाहतदृष्टेनेति। तत्वांश्रयासिद्धिः तत्राविद्यमाने पिवाचक
त्वाभावस्यदर्शयितुं शक्यत्वात सर्वथा ऽप्रसिद्धभावात परस्यसिद्धत्वात। वर्णोस्त्येति। अन्तमयासिद्धार्थप्रतीतिः पक्षः वर्णान्त्येति साध्य
वर्णप्रतिपत्त्यनन्तरमुत्पद्यमानत्वादितिहेतुः धूमादग्निज्ञानवदितिदृष्टांतः प्रयोगांतरमाह दीपवदितिगकारादित्रयंपक्षः गोत्वप्रतिपाद
कमितिसाध्यं। गोत्वप्रतिपादकत्वापूर्वंध्रुवंप्रतीयमानत्वादितिहेतुः रूपप्रदीपवदितिदृष्टांतः। तत्रैवहेत्वंतरमाहतत्पूर्वमिति। यत्पूर्वंहियत्प्र
तिपद्यतेतत्तस्यप्रतिपादकंयथादीपारोपणं। प्रतिपद्यमानस्यघटस्यप्रतिपादकं। वर्णोच्चारणपूर्वोर्थः प्रतिपद्यते अतोवर्णः प्रतिपादक
इत्यर्थः। उभयमितिसंबंधस्यापौरुषेयत्वंचेत्यर्थः। अपोहरूपमिति। अपोहरूपसामान्यवादिनश्चायमभिप्रायः नतावद्याद्वत्तरूपाणामे
संतविलक्षणानीविशेषाणामनुवृत्तः कश्चिद्धात्मासंभवति। नचातद्यामेवाभिधेयत्वमानंतत्वभिचाराभ्यांअतो ऽतद्व्यावृत्तिरेवसर्वानुगतार्था
दर्थइति। यथाशावलेयस्यागोव्यावृत्तिरेवंबाहुलेयस्यापीति। यथाहुः यद्रूपंशावलेयस्यबाहुलेयस्यनास्तितत्। अतद्रूपपरावृत्तिर्द्वया
रपितिभिद्यतइति। बुद्धेरिति। अब्राह्मणइतिबुद्धेः क्षत्रियत्वादिविशेषालंबनत्वासंभवादित्यर्थः॥ प्रतीतीति॰ अत्राप्यव्याख्यानुरूपस्यसाधा एम०
६

रं लक्ष्यार्थस्य प्रतीयमानत्वादित्यर्थः। विग्रह इवास्यार्थे। अब्राह्मणपाभावयुक्तः पुमानित्यस्यार्थे। तद्भावेति। ब्राह्मणत्वाभावयुक्तसामान्यं पुंस्त्वमवलंब्येष्टः
एवं स्ते नैवानुरूध्यातन्नवस्तुत्वादित्यर्थः। सादृश्यस्यापीति। अब्राह्मणो ब्राह्मणसदृश इत्यर्थे। एतेनेति संबंधिसामान्यसात्रेणेत्यर्थः। वस्त्वे
वेति। अब्राह्मणादिशब्देष्वेवापोहं प्रत्यवाचकत्वावगतिः गवादिशब्देषु तु वस्तुस्वरूपमेव लोके वगम्यत इति भावः। उक्तं च तत्र साधे ष्वेवणाद्वेषु नञ्
योगस्तेषु केवलं भवेदन्यनिवृत्तांशः स्वात्मैवान्यत्र गम्यत इति। अमात्सेविशेषा इति। मास्त्वपोहस्य शब्दार्थत्वं भेद एव तत्वान्न शब्दार्थो भविष्यतीति
तावता गवादिसामान्यस्य शब्दार्थत्वमिति। तन्न। विशेषणानामानन्त्येन संबंधग्रहणासंभवात्। यदि चापोहत्वं सामान्यमेव शब्दार्थ इत्युच्येत तद्
विकल्पमानं वस्तुरूपमवस्तुरूपं वास्यात् नाद्ये जातित्वसा। नांत्य उपोहमात्राभिधानं तत्तत्त्वे पूर्वमेव निरस्तं। अथवापोहत्वं नामस अपो
हापोढवतोः संबंधः कृत्तद्धितसमासेषु संबंधाभिधानं भवाप्रस। येनेति स्मरणाव तद्व्ययुक्तं। संबंधस्य सामानाधिकरण्यानुपपत्त्यापत्त्या च
स्यभवद्भिरवनिराकरणात् इत्याद्द्योतनेविशेषावाचित्वे केवलं तत्वास्त्वित्यर्थः। नत्वब्राह्मणमानयेत्यत्र नञोऽभावार्थकस्य ब्राह्मणपदेनान्वयात्
नञः सादृश्यलक्षणायां ब्राह्मणपदेनान्वयः नहि ब्राह्मणसदृशो ब्राह्मणत्वस्यान्वयः संभवतीत्यत आह। ब्राह्मणवाक्यस्यैव ब्राह्मणसदृशे शक्तिरिति मतमपा
करोतीति नञ्समास इति। ब्राह्मणपदे ब्राह्मणसंबंधिलक्षणायां नञर्थान्वयात् उत्तरपदार्थसादृश्यलक्षणायां लोपपत्तौ न शक्तिकल्पनं युक्तमित्य
र्थः। अघट इत्यस्य घटान्योन्याभाववति शक्तिरिति मतं निराकरोति अघट इति। घटपदे घटप्रतियोगिकत्वलक्षणायां नञर्थेनान्वयः। यपदसामाना

धिकरणानुपपत्तेऽभावद्वलक्षणा। तथा च घटप्रतियोगिकाभाववान्पट इति वाक्यार्थः स्यादिति इदानीं समासेऽपि लक्षणेति दर्शयति। व्यासे
पीति। अत्रापि नञ्पदं स्वार्थाधिकरणे लाक्षणिकमित्यर्थः। कुतर्हि नञो मुख्यार्थत्वमत आह नपचतीत्यादाविति। पाकघटयोर्नञर्थेन सामाना
धिकरण्याभावादित्यर्थः। आवीतहेतुमिति। आवीतहेतवो नाम पक्षव्यावृत्तिमुखेन ये साध्यं गमयंति यथा प्राणादयः। ते हि निरात्मकेभ्यो घटा
दिभ्यो व्यावृत्ता जीवच्छरीरस्य निरात्मकत्वापोहेन सात्मकत्वं गमयंतीत्यर्थः। आक्षिप्तेति शब्दार्थमाहेति। तस्माद्भवतो भाष्यविरोधरूपं दूषणा
मिति शेषः। एतदिति। सास्नादिभिर्विशिष्टत्वमित्यर्थः। अवयवेष्विति। यद्यवयवेषु गोत्वं वर्त्तेत तदाऽवयविवत्सास्नादिविशिष्टं तस्य संभवेदिति ष २
भावः। गोत्वोपलक्षणतयेति। उपलक्षणतयोपादानं न तु विशेषणत्वेनातो नोक्तदोष इति भावः। तेषामिति सास्नादीनामित्यर्थः। रुचकादीति।
रुचकः स्वस्तिको वर्द्धमान इति प्रसक्षमानन्तिर्हेषणत इति भाष्ये रुचकाद्युदाहरणमित्यर्थः। वनबुद्धिरपीति। यथा गोत्वबुद्धिर्विलक्षणेषु नाना
पिंडेषु जायमाना न समुदायालंबना तथा वनबुद्धिरपि बहुषु वनेषु विलक्षणेषु इदं वनमिदं वनमित्येकरूपा जायमाना न समुदायालंबनाऽस्या
दित्यर्थः। एको व्रीहिरिति। अत्र व्रीहिशब्दाग्रेषु जातिशब्दानां हस्त्यादीनामुपलक्षणार्थः। पत्नीति। पत्नीशब्दो ब्योपाधिको यत्र स्वामिभावर्तमा
नो व्यक्तिवचनः स चाजतिसंख्यायां व्यक्तिमवच्छिनत्तिपत्नीसंग्रा। स्थलनि। तस्मिन्मंत्रे बहूयो बहुषु। चैकवचनस्यैव प्रयोगात्। आकृतिसंख्यावाचिनाश।
ह्यनग्रहत्ति निमित्तं यस्त्स्वामिलमोवाख्येतेन हि पत्नीत्वं नामाकृतिरस्ति। अस्मानिति तिव्यक्तिमवयवसंख्यया। अदितिः पाशान्सित्रमं। त्रेजातिव

यमः पाशश्च बृहदेकस्मिन्नपि पाशे बहुवचनान्तः प्रयुज्यमानो जातिद्रव्यावयवसंख्यया वक्ती सक्तमिति। ये चैते श्रीसौदिशद्वा स्तेप्रयोगभेदेनय
थारुचि संख्यां भजंतर स्यात्तत्रेति। वनं दाराः दिशः व्याप्तव्यवच्छिन्नसंख्यावचनाः नाऽस्साहवानति। एतादवदृष्टांतेनोपपादयति जंगमद्रति। कीदृशीपु
नर्दाराद्दिश एषामां अवस्थातां दर्शयति। तात्रति। दाराशब्दो हि सर्वदा बहुवचनान्तः सन यदिकव्यक्त्यभिप्रायेण प्रयुज्यते तदावयवसंख्यया ख्य। क्क
भेदमाचष्टे। यदा त्वविवक्षितव्यक्तिभेदो दारमात्रपरः तदा व्यक्तिभेद इति। वनशब्दस्य त्वेकसंख्यैव विवक्षिते सा हु० वनशब्द इतिजातिग्रहं
णं बहुत्वं दशसमुदायानामुपलक्षणार्थं। यस्तु भिन्नेषु बालेषु वनानीति प्रयोगः स्यात् शब्दबहुत्वं जाता वुपचर्यते क्रियते। द्रव्यसमुदायवचन
त्वे लक्षिता। दृणाद्यभिप्रायत्वे वा वनस्य तद्भेदाद् बहुवचनमिति। असत्त्वमिति यदि वनेऽप्यनहेतुनासद्भाववदिपरीतः प्रसयठसद्यते मिच्छे
षवनप्रासय इति आत्ता वनं नासी सवगच्छामः इस नेन भाव्ये गोसर्थः। अविनाभावेति। शब्दार्थयोर विनाभावाभावे शाब्देनार्थज्ञानानुपपा
त्तः न हि वस्त्वंतरावगते वस्त्वंतरं ज्ञायातस्मात्ता विनाभाव एवनयोः संबंध इत्यर्थः। समयं निराकर्त्तुं विकल्पयति समय इति। प्रतिमर्त्यं यस्सम
पि विकल्पयति। प्रत्येकमिति कल्वेतावन्तं तत्तैवन स्यात् एकस्य बहुभिः क्रियाऽसंभवादित्याह एकद्व इति। भेदस्तु प्रतीतिविरुद्ध एवेत्याह भि
न्नश्चेदिति। भिन्नत्वे च तेषामर्थप्रतीतिकारणत्वात् स्मा न कशक्तिकल्पना स्यादित्याह भिन्नश्च इति। किंच यस्य केन चिद्द्रव्यासंबंधः कृतः स
वक्तंतरप्रयुक्तादर्थं न प्रतिपद्येत। न ह्यस्मिन्संबंध ज्ञातशक्ता वमस्मात् ज्ञातशक्तिकादर्थप्रतीतिः संभवति। वक्त्रंतरेणापि प्रयुक्तश

ष्टस्य संबंधानुसारेणाश्रोतार्थं बुध्यत इति चेत्तन्न । यस्मादनेकैः पुरुषैर्नानार्थविषयाः अनेके संबंधाः कृताः न सर्वत्र दृष्टार्थः कथं प्रतिपद्येत । तस्मा
न्नार्वाचीनः संबंधकर्त्ता संभवति । यदि च संबंधकर्त्ता स्यात् स्मर्येत । यथा वृद्धिशब्दस्य संबंधकर्त्ता पाणिनिः स्मर्यत इति । न हि विस्मर्यते तत्रकर्तरि ह
ष्टिर्यस्याचार्यादिति न कश्चित्स्मरतीति चेत् । एवं शब्दार्थसंबंधकर्त्तापि व्यवहारेव वर्णस्मर्तव्यो भवतीति । पदेति । स्रष्टा वायं प्रजापतिः सदाक्षा
वतिष्ठते । पृथिव्यादीनामसंभवात् अशरीरस्य तस्य प्रयत्नादेरसंभवात् स्रष्टृत्वानुपपत्तिः नापि शरीरी तस्य भौतिकत्वात् भूतादीनां च तदानीम
भावात् सर्वाभावे च निःसाधनस्याद्यप्रवृत्तिर्न संभवतीत्याह यद्वेति । न हि इच्छामात्रेणैव जगन्निष्पत्तिः किं प्रयत्नेनेति चेन्न । अशरीरस्ये
च्छाया अप्यसंभवात् । अत एव कश्चिच्छारीरात् साधनमपि न संभवतीति । तदिदमिति । केचिदौपनिषदा इत्यसार एव स्थानुपपन्ने संगत
पूर्वपक्षस्य दूषणं । तत्रावसरस्तीति । यदात्मनो निर्विशेषत्वं तदैव धर्त्तनतारंभकत्वमिति स्वभाव इति शंकायामवसरलाभः । कापि वर्णि
तादिति । धर्माधर्मयोः फलजननानंतरमेव नाशो न तत्रान्तःफलोत्पत्तिपर्यंतं तत्संभावकल्पना । अतः प्रलयेपि तयोर्न शिनाशितीत्यर्थः । अनकं
प्येति । अस्पष्टशरीरिणां वास्माकं युक्तानामिव न किंचिदुःखमस्तीत्येतेनानुकंप्येरन् । अतो नकंपाभाव इत्यर्थः । क्रीडार्थं क्रीडा हि विदेजनितस
र्वार्थैव न एणानं चाप्रसरस्य साऽसंभवति तदनवाप्तो चाकृतार्थता तस्य गामे स्वर्प्येन सिध्येदित्यर्थः । किंच क्रीडा सायासा रमयति । अयं च सम
स्तभूधरादिविषयो महायासेति रूपः क्रीडार्थ इति वाचो युक्तिर्नीचे जनमनुरंजयतीति । एवमिति प्रयोजनरहितप्रवृत्तौ च बुद्धिमत्त्वहानि

रित्यर्थः स्वर्गान्तरमाह न्यायतिरिक्श्चेति। तत्संभवतीति। ननु संज्ञाकरणं विशेषेनुद्दिष्टानि संज्ञाः क्रियां न च ज्ञातस्योद्देशः संभवति अतो न
र्थकं संज्ञाकरणमशक्यं चेति भावः। विषयामदत इति। अनंतर्येवि वयोर्द्वि प्रसस्य विसंज्ञा। होनासाव विशेषवर्ज्जिनी चोदनां वा धत्ते विधिमेदा
दित्यर्थः। यत्त्वं संनद्ध रितोधेवमेपश वोभूयास रितिकामप्रनेत स्यापि किंतादेव फलात्तस्याह० तथेति। यदा कदाचिद्भवतः फलस्य साधनं वि
ध। यस्मानंतररितापेक्षयाप्याहएवं भवतीत्यर्थः। किमेष एवोत्सर्गः स्वर्गादमृतफलं इहवाप्युमुत्र वा भवतीति लेसाह साधारणमिति। यत्तुवल
हव्यादिकं स्वभावत एव हुसाधारणं तद्यथैव सर्वेषामिष्टं तथैव स्यान्नेतद्ध सर्वेषामासन्नतये। वष्टंभ्यतस्तादिहिकामदेति। ननु चित्रादिव
दत्रापि कमिपदमविशिष्टत्वात् स्यानंतरं वृष्टिकामइति श्रूयतेतत्राहकमिपदमिति सत्यमेवेतथाप्यनंतरमेव फलं भवति कामनः सामथ्या
न्तरहस्यभिचारणस्प्रोपद्रवशमनादरो हिकस्यैव सर्वैः काम्यमानत्वात्। कथं तर्हि क्वचिक्कृताया मपिकारीर्यानानंतरमेव फलोत्पत्तिः स त्रा
हफलतीति। दृष्टिविरूद्धफलेन शास्त्रप्रतिबिद्धेन केन चित्प्रबलेन कर्मणा जन्मांतरानुष्ठितेन प्रतिबंधस्तदाकल्प्यते० न च प्रतिबंधादसा
धयतः साधनत्वहानिरिति० कथं तर्हि ह्याकृतकारीर्यादिकर्मणानुष्ठितिस्यमिति कर्मान्तरादिति ब्रूमः जन्मांतरानुष्ठितमपि कर्मादत्तफ
लं स्वफलोत्पादनाय शरीरमिव वृक्षादिकयारभत इति न कश्चिद्दोषः। तेषां ज्ञानानामित्यर्थः। स्थोल्यादीति शरीरस्य पितहिरूद्धाव
स्थांतरेण पूर्वावस्थाया नाश इति भावः परिहरतीति नेति अन्यत्रापि प्रत्युरेवावस्थांतरं तेन सस्यापि शरीरे सुखादिनाशः कार्श्यादिवत्संभव

टिप्प० नीतिभावः प्राणादिनामिति० कार्यादीनां देहगुणानां तन्निष्ठत्वोत्पादिरूपगुणानां ज्ञानप्रयत्नात् नाप्युः प्राणादिनाशेनुनशरीरनिष्ठगुणानां तल्लेपघातोस्ती
ति प्राणादीनां न निर्गुणत्वमिति भावः। तदुपपत्तिरिति प्रसङ्गि सोपपत्तिरिति भावः। कथं तर्हीति। देहस्यात्मनः सकाशात् सरत्वे इदमिति परामर्शः स्या
१२ दिति भावः। गूढाभिसंधिरिति। आत्मने तेय त्वे विषयत्वयाहार सानुपपत्तिरित्यभिसंधिः। नहीति। भावरूपं सर्वं यत्कारणवत् उत्पत्तिधर्मकं दृष्टं त
क्षयधर्मकमेव घटादिवत्। अतो न सुखात्मिकामुक्तिरात्मज्ञानेन क्रियत इत्यर्थः। शरीरसंबंधो हि बंधस्तदभावो मोक्षः। तेन निष्पन्नानां
देहानां प्रध्वंसाभावः अनुत्पन्नानां च देहानां प्रागभावः। स एव मोक्षः। कर्मनिबंधनश्च बंधः कर्मक्षयादेव न भवतीति सिद्ध्यसभावात्मकश्च वे
मोक्षस्य नित्यता। न त्वानंदात्मकत्वेनेत्यर्थः। वासनानां बंधप्रध्वंस एव मोक्षः नन्वप्रागभावसहितः सकलकर्मक्षयो न संभवात्। कारणान्त
रसमवधाने हि प्रागभावः संभाव्यते न च तत्प्राप्तिधर्माधर्मरूपसकलकारणक्षयात्। न चाभावरूपस्यापि मोक्षस्य ज्ञानसाधनमित्याह न च
ति। नन्वस्तु नाम कर्मक्षयाद्वा मोक्षः स एवं तु कुतस्तत्राह तत्त्वेति। यस्तु देहादिविलक्षणमात्मानं जानाति तस्य पूर्वजन्मनां कर्मणां फलोपभो
गेन क्षयात् तन्निमित्तशरीरोत्पत्तितः आगतानां च कर्मणामननुष्ठानाद्वा सत्त्वाद्देहांतरानुत्पत्तेः संज्ञासंबंधः शरीरेण भवतीत्यर्थः। नन्वसत्यपि
कर्मणामात्मापि तत्संयोगादेव शरीरनिष्पत्तेर्नामोक्षसिद्धिरत आह कर्मेति। धर्माधर्मसहितस्यैव तत्संयोगस्य शरीरे हेतुत्वमित्यर्थः। अतो मो
क्षार्थिभिर्नैव वावक ज्ञानमात्रेण तन्नार्थ्यं प्रममात्रेः स्थानत्वं किं त्वेवं कर्तव्यमित्याह मोक्षार्थीति। काम्यनिषि। दुःखस्य फलोपभोगायप्र राम०
१२

रिरमारभे। ततेनशरीरारंभं परिजिहीर्षता। ते। नकर्त्तव्ये। नित्यानैमित्तिके च पूर्वजन्मार्जितधर्मक्षयाय कर्त्तव्ये। तदेवमात्मोपासनया पि पूर्वजन्मकर्मक्ष
यद्वारेणैव मोक्षसाधनत्वं। उपासनं च ध्यानं। एतदभिप्रायं च ज्ञानाग्निः सर्वकर्माणीत्यादि। ननु नित्यान्येवाग्निहोत्रादीनि स्वर्गार्थान्यपीति तानि
कुर्वतः कथं मो। क्षेत्यत आह प्रार्थ्यमानमिति फलाभिसंधिजन्मानमेव स्वफलदानेन क्षयं च धर्मं जनयन्ति अनभिसंधिकृतानि त्वन एवानाश्रितः कर्मफ
लमित्युक्तं। यच्च विवेकज्ञानविधिवाक्यशेषे ऽपुनरावृत्तिश्रवणं तदर्थवादमात्रं। अर्थवादश्चालंबनं दर्शयतीत्यास्मत इति। इहैव विज्ञातमात्म
तस्य वहि देहसंबंधः वैराग्यात् तयोः क्रमो क्षेपायानुष्ठानेन मुक्तो भवतीति तन्दालंबनोऽर्थवाद इति। सदसदिति। सद्रूपस्यासद्रूपस्य कीर्त्तनं
तथाऽविनाशिनो विनाशिनश्च कीर्त्तनं तेनमूठ्यामेत्याच्चोदितः सिद्धांतरूपेमुत्तरमाह इत्यर्थः। कृतमाप्नोतीति। कर्त्रा कृतेन कर्मणा नाशः भो
क्तुश्चात्तत्कर्मणापागमः इत्यर्थः। कर्मजं जन्मत्वं। तत्कत्वमित्यर्थः। तदनुपपन्ने इति। अव्यवहारादित्वानुपपत्तेरित्यर्थः। ननु धर्माधर्मायगही।
तानभोभागः श्रोत्रं न सर्वमाकाशं। भागभेदाच्च संस्कार व्यवस्था कस्य चिच्छ्रवणं न सर्वेषामिति च व्यवस्था सिध्यसत आह तस्येति। विषयस्या
पीति। श्रोत्रविषयस्य शब्दस्येत्यर्थः। दृष्टं चेति। अदृष्टरूपे संस्कारस्यादपि काचिदव्यवस्था स्थिरवाघपनघनरूपेनु संस्कारतास्येकरूपत्वा
तन व्यवस्थासिद्धिरित्यर्थः। शब्दैकत्व इति स्यादपि शब्दभेदे कथं विभ्रस्कार व्यवस्थानत्वेकस्मिन् शब्दे सा संभवतीति विरुद्धत्वादित्यर्थः। ततः
किमित्यत आह एकेति। ननु विभुत्वमेवासिद्धं तत्राह कार्म्येति। न नित्यं जेन। गगनं हि न तद्याधि परिच्छिन्नमेव प्रदेशो वृगृह्यते। न कान्स्येन। सामा

टिप्प०

१२ स्यापीदमेव कार्य्यम्प्रयः सर्वव्यक्त्यनुरागः न चैकस्यैकत्रावगतिः एकैकव्यक्त्यनुरक्तप्रतीतिः आरोप्यक्तं तयोर्विभुत्वं। शब्दस्यैकैकत्र कार्य्येण नावगमात्

13 घटवद् विभुत्वमिति। तस्माद्युगपद्देशकवचनुच्चारितस्य गकारस्य नानात्वं। अविभुत्वे सति युगपन्नानादेशेऽपि वगमात्। घटवत् एककालस्य वा न नानादेशेषु

गमः स्यादित्याह। एक इति। एकत्वे हि एकेन प्रयुज्यमानस्तस्यैव स्थितो मुखान्तरेण न स्यात्। यथा तदेवमत्वं सखान्तर रूपकत्वे उपक्तो नानानादेशोपल

भ इत्याह कार्य्यत्व इति। कथं तर्हि घस्मिन्सतत अत्राह तेनेति स्थालाद्यविवस्मि प्रायः यदि चार्वपत्यं तन्त्रान्तरविपरीतमेव च व्यक्तं तत्सर्वं वक्तव्यमित्या

ह अयदीति। तदनुसारमेव दर्शयति। दिश इति। अधिगुप्रे वे हि संज्ञप्यमानस्य पशोरंगाभ्यां मलयेऽभिधीयमाने दिशः श्रोत्रमिति वचनेन श्रोत्रस्य

दिक्सम्प्रलयोऽभिहितः। तत्र यथा सूर्यमस्य चक्षुर्गमतादिति तेजोरूपे सूर्ये चक्षुर्विलयेन तेजः प्रकृतित्वज्ञानं तथा श्रोत्रस्य दिक्प्रकृतिकत्वज्ञा

नमिति। अवस्थानादिति। उच्चारणानन्तरमवस्थानाभावादित्यर्थः। कथमिति तत्राह आकाशेति। रूपस्येति आकाशरूपस्येत्यर्थः साधनाभावादिति।

व्यंजकाभावादित्यर्थः किन्नचिरमिति। अभिव्यक्तस्य पुनस्तिरोधानेकारणाभावादिति भावः यथा घटादाविति। चाक्षुषस्य तेजस आप्यायनेऽनुर्वर

प्रदीपो यथा चाक्षुषाणां घटादीनां व्यंजको भवति॥ तथा ध्वनयोऽपि श्रोत्रसंस्कारकं वैन्नः शब्दस्याभिव्यंजका भवन्तीत्यर्थः। यौगपद्यादिति। शब्दः

कृतकः नानादेशेषु युगपदुपलभ्यमानत्वादिति हेतुरिति। देशाभेदेति। अत्रैव देशेणात्मेऽस्ति वा अत्रैतिकथं देशभेदभ्रान्तिरित्यर्थः। ननु भिन्ना

एव तत्र प्रतिबिम्बानीत्याह नचेति। न हि बिम्बावस्थितिविवस्मभेदोऽस्ति प्रसभिज्ञानात् न तत्र प्रतिपात्रभेद इति भावः संप्रसारणमिति। यकारस्येकारः एम०

१२

प

संप्रसारणं वकारस्योकार इति। तत्रापि क्वचिद्विषये यकारस्य साधुत्वं क्वाचित्कारस्येति। तद्रूपस्य वा पुरुषस्येत्यर्थः। वक्तुमिति अनुमानप्रयोगे विवक्षि
तेऽर्थे साधिदूषणं वक्तुमशक्त इत्यर्थः। फलवदिति। फलवतागवानयनादिव्यापारस्यांगभूतोऽर्थप्रत्ययः तत्फलेनैव फलवान् शब्दः। स्वयं तु निष्फ
ल एवेत्यर्थः। प्रयोगे सूत्रकारस्यापि संमतिं दर्शयितुमाह अर्थापत्तीति। नद्वयमिति। भेदे सत्येव तद्व्यासंभवति न च मीमांसकमते भेदे लिंगमतस्त
द्वयं तन्मते सिद्धमित्यर्थः। इतिसंबंधेति। इतोपीत्यादिना कर्तुमितांश्चेन भाव्येणासंबंधनिमित्तद्वारेणाशब्दनिसत्तं साध्यत इत्यर्थः। जातिमेवेतिज्ञा
तेरेकत्वादकृतिष्ठः संबंधः सेत्स्यतीति भावः। चतुर्जातीति। पार्थिवत्वद्रव्यत्वसत्त्वलांगूलत्वगोत्वाद्यनेकजातिसंपिण्डितगोपिंडे। गुसत्रत्विनष्टस्यगो
शब्दस्यान्वयव्यतिरेकासंभवात्तन्न निष्कृष्टगोत्वमात्रे शक्तिनिर्धारणस्यादित्यर्थः। नित्यत्वित्यादिभाष्यग्रंथः। अन्वयेति तज्जातीयेषु सर्वेषु प्रयो
गे तदतज्जातीयेषु चाप्रयोगादित्यर्थः। नन्वेवं स्थापित्वमात्रसिद्धेऽन्यनुनित्यत्वमत आह तावत्कालमिति। प्रमाणांतरोपस्थापनादितिअतस्तदे
वात्र प्रमाणं न कृतत्वमुत्पत्त्यसय इति भावः। प्रत्यक्षात्वभेति। प्रत्यक्षत्वे सति प्रत्यभिज्ञायमानत्वादिति हेतुविशेषणादित्यर्थः। तत्त्वेति। संयोगविभा
गाख्यं कार्यमित्यर्थः। स्वाभाविकत्वादिति एतत्त्व पुंसः स्वाभाविकमात्मानित्यमित्यर्थः। विषयेति। विषयपदेन विषयघटादिभेदेनानुष्ठीयमा
नभेदस्थितिशक्तेः कार्यभूतः पुंसो ज्ञानाख्यो विकार उच्यते। तस्यानुमेयत्वं प्रत्यक्षत्वाद्दर्शितं तदुदाहरणभासइति। ननु बुद्धेः प्रत्यक्षत्वज्ञा
त्वविरुद्धं ज्ञाततालिंगकानुमानगम्यत्वं गीकारात्तमेवं बुद्धिज्ञानयोः स्वरूपभेदेनानुपपात्तः। अयमत्र विवेकः॥ चेतनं संचितिशक्तिर्यासः

टिप्प० १४

14

सा बुद्धिरूच्यातात चितिशक्तेः कार्यभूते विकारः पुरुषः स्ययः १ ज्ञानाख्यः सोनुमेयस्तत्रणास्त्रोस्मिन्नुपवर्णितः। चितिशक्तिर्यदा बुद्धिः कथं प्रसक्ता नव

२ शक्तेरतींद्रियत्वं हि मीमांसायां प्रतिष्ठितं शक्तिः कार्यानुमेयत्वादिति वार्त्तिकपासमात ३ चैतमप्यवणास्त्रेस्मिन्बुद्धिरिसभिधीयेत चिति

प्रक्रियुतं तन्न प्रसक्तं सर्वादेवनः ४ भेदबुद्धिस्त्विति। अयमपि मुक्तोयमविमुक्त इति भेदबुद्धिः। शब्दोयपयेति। पोहुलिं। लेकः युहुला एव

वर्णापरमारवारश्च: सयथा निरस्तः। तानेवन्यायेन शब्दस्यान्वयवयोगो पि विरोकर्त्तेव्यः बाधन्वयव्यतिरेकानुविधायित्वं तुणट् स्पंजकतया प्रा

गेवोक्तं। तस्मादिसधिकरणार्थोपसंहारः यतोस्य हेतुनास्ति उच्चारणस्याभिव्यंजकत्वात् यतश्च भागानसंन्नियतश्च सर्वदेशे साक्षात्द्भावात्‌श्च

परोक्षीभावात्सर्वगतस्तस्माद्योमादिवन्नित्य इति श्लोकार्थः। आनुपूर्व्यनित्यत्वादिति। आनुपूर्वीक्रमः तस्यानित्यत्वात् वाचकानित्यत्वमित्यर्थः

एत[redacted] देवोपपादयतिपदहीति। कथंक्रमस्यानित्यत्वमतआह तथाहीति। कुतस्तर्हि तत्पुक्रमो

तत्राह ध्वनयोहीति। ननु नित्यत्वेपि पुरुषस्वातंत्र्याभावान्नाप्रामाण्यंपतत्राह क्रमेति। पुरुषोहि स्वविवक्षानुसारेण क्रममारचयति श्चतस्तत्र

पुरुषस्य स्वातंत्र्यमित्यर्थः। तदुपपत्तेः क्रमोपपत्तेरित्यर्थः। तस्याचु तिक्रमस्येत्यर्थः। एतादेव विहृणोति। वक्रेति। कथंपुनरवगम्यते सार्वपरोक्त

प्रकाशमवक्रमं विवक्षितिन नु कश्चिदपि स्वातंत्र्येणेति। तत्रोत्तरं संबंधवदिति। कर्त्रुस्मरणादित्यर्थः। नन्वस्तसपि स्वातंत्र्ये पुरुषकाप्यता तावक्र

मस्यास्तीति तत्त्रद्धि शिष्टस्यापिं कथं नित्यत्वेति तत्राह तनेतिनक्रु रस्थति सतांवाचकस्य भ्रमः किंतु यव हारादिवासति सत्वं। अनिदंप्रथममवमिति

टिप्प० १५

यावत्। गकारौकारविसर्जनीयानामेषामवरहयो नित्यक्रमेण व्यवहारप्रयोगो नित्यं प्रथम इति पदस्यार्थः। प्रथमत्वं नित्यत्वामवचनवर्स्य वक्तुरस्य
नित्यत्वमिति। नान्वेवमपि पुरुषकार्यता स्येव तदधीनं च प्रामाण्यं शब्दस्यापन्नमतत्प्राह यन्नत इति। स्वातन्त्र्ये हि पुरुषस्यैतदायत्तं प्रामाण्यं स्या
त्तत्परतन्त्र्ये। उच्चारणपरतन्त्रो हि पुरुषः न ह्यस्माभिरुच्चार्यमाणानामपि मन्वादिवाक्यानामस्मादिदोषवशादप्रामाण्यं भवति। व्यवहारस्यैव
नि। अव्यवहारेऽत्र क्रमविशेषविशिष्टवर्णप्रयोगरूपो ज्ञातव्यः। ईदृश इति। अर्थप्रत्यायकमित्यर्थः। यदा च वर्णा नित्यत्वादिना पदस्यापि व्यवहार
नित्यत्वमेवं चायदुक्तं वर्णानां नित्यानां तन्निष्फलापरमाणुवदिति तत्परिहृतमित्याह तेनेति॥ ० ॥ उपमानो॥ आनर्थक्यादिति। गोशब्दे नित्यत्व
कृतत्वादिसंसृष्टसकलव्यक्तिप्रतिपादनात्तस्य कृपदेशापि पुनः प्रक्रमसंसर्गप्रतिपादने तस्यानर्थक्यं स्यादित्यर्थः। अत्रादावुपन्यस्तमव्या
ख्यातयात्मपक्षवदुवक्त्यवच्चादुपेक्षासहचीकसहमायेन पक्षान्तरवादनित्यकारणि। नात्रेति। अंसपदस्यवाक्यत्वं परैरनुपन्यस्तमपि सं
भवादुपन्यस्तं। तदनन्तरमेव वाक्यार्थप्रतीतिर्जायमानत्वात्। क्रमभेद इति। गामानयेत्येकः क्रमः। आनय गामित्यपरः क्रम इति क्रमभेदः। न ताव
दिति। उखायामोदनं काष्ठैर्देवदत्तः पचेदित्यत्र द्रव्याणां परस्परसंबंधो न संभवतीत्यर्थः। असंतमिति। असंतमभेदेन तादात्म्याभावात् निष्पन्नत्वेन
कार्यकारणभावाभावात्। षष्ठ्यभावाच्च संबंधमात्रस्यापि वाक्येनाप्रतिपादनात् निष्पन्नत्वाद्वचनपरस्पराकांक्षासिनिराकांक्षाणां षट्कथं प
रस्परसंबंध एकवाक्यता चेति। षष्ठ्यभावेऽपि संनिधानात्संबध्यत इति चेत्। न कारकविभक्त्यासन्निधिबोधेन क्रियासंबंधावगमादित्यर्थः। एवं

टि॰प॰ १५

क्रियाकारकयोः कारकाणां च मिथः संगतिर्निरूहकत्तात्क्रिययोरिदानींधानुप्रत्ययवाच्यायार्निरस्यन्निएवमिति। एवंनामाख्यातयोस्संगतिन्निरस्ता संप्र
त्युपसर्गनिपातानांनिराकरोतिएवमिति। लुङ्चेदृशमिति। इंङ्ग्विगतिहध्योरितिधातोर्लुङिअध्वगृतिरूपमित्यर्थः। पंचमीपरदृति। अगात इहस्था
दितिपंचम्यंता ऽगश्च इत्यर्थः। पदास्मेति। विप्राख्यादिषुपदांतरत्वमेवनामाख्यातानां। मतोनान्वयव्यभिचार इत्यर्थः। ननुपदांतरत्वेषामेव
वर्णानां समस्तस्कथंतदभेदेपदं भिन्नत्ववर्णात्मकत्वासद्दसा। तत्राहकेनचिदिति। नामत्वाख्यातत्वादिधर्म्मभेदेनेत्यर्थः। यथाज्ञराराज्ञादि
षु क्रमाभेदः। अध्वपदमिति। अध्वपदंलोकप्रयोगमात्रेणाप्रवचनतयानामत्वेनापि संभाव्यमानं। भतेल इड्विलङि·व्यसंग्विसादि
नाद्वेरङादेशः ध्वयातरहसादित्याकरणासंसान्वाख्यानवशेनलुङि मध्यमपुरुषैकवचनं इङ्थी ग्विगतिगतिहध्योरितिधात्वानिर्णी
तमित्यर्थः। लक्षणेनेति। लक्षणमिकोयणचीत्यादिसूत्रं। तद्विदः सूत्रार्थविदः उक्तिरूपादणलस्मात्संधयं इणसंभवइत्यर्थः। यथाशद्
भिहिताः पदार्थाः संबंधमनपेक्ष्यैववाक्यार्थं प्रतिपादयंतोलोकाबद्दसाधारणेनैवशहस्यप्रमाणांतरत्वमापादयंतितथादर्शयितुमार
भातत्रापिचेति। प्रकृतमेवेति। प्रत्ययार्थत्वमेवांगीकृत्यप्रत्यंतं प्रमेयंनिरूपयामइत्यर्थः। नन्वस्तुनामसन्निहितस्यवाक्यवशणद्यागांगत्वं
वाक्यांतरगतस्यतुकथमतआहवाक्यांतरेति। अपेक्षायांकारणमाह उपायेति। कृतुपकारेति· फलवदभ्यावतांगत्वेनावस्थितस्यकरणस्यानु
ग्रहएवफलंमेतेषामित्यर्थः। एकभावनयेति। करणंसाध्यस्योत्सस्युपकारं कुर्वन्तीतिकर्त्तव्यतानुकारणस्यफलजननसामर्थ्यमित्यर्थः। का

ए॰प॰ १५

15

रणमाहभावनेति। साध्यान्विताद्धि भावनासाध्यानपेक्षातेवरूपेणसाधनमपेक्षतेकेनेदंफलंकर्त्तव्यमितितदनुतदाकारप्रग्रहेरेमणतत्‌· तथैवस्वंभा
वमपिसाधनानपेक्षतेनैव। कीदृशेनव्यापारेणेदंफलसाधनंस्यादितिनचवाक्यभेदोऽश्रहूयविशिष्टव्याभावनायाः फलेविधानादिति। भावनाव
द्वेगामानयशुक्लामितिवाक्येऽऽनयनस्यजातिसंबंधाविच्छेदेनैवगुणकांक्षातत्संबंधाविच्छेदेनैवचजासाकाक्षादर्शपितत्वेसाहः· आकांक्षे
ति। अंगत्वान्नामिवद्वातिगुणयोरेकक्रियान्वितयोर्मिथः संबंधसिद्धिरित्याहएकेति। यत्तगोत्वशुक्लत्वयोर्नेश्वरस्यानुरागदृष्टतत्राह द्वये
ति। यत्रद्वयमवच्छिंदंजीजातिरानयनांगंगुणोपिताद्वावच्छिंदन्तस्मिन्कर्मणिवर्तेन्नरः। सततद्वगुणस्यजातिविशेषणत्वमितिभावः। त
तः प्राणित्ति· यथाकुंभकारादितिसमासोत्तरपादेतदागमसायनेवार्थवत्वं सिध्यतितद्वदित्यर्थः। उभयत्रोदाहरणमाहत्र्यापिंगरति·
ईषत्पिंगोत्प्रापिंगः प्रगतवर्याः प्रवयाः। क्वचिदिति। प्रवसेदक्षिणांदद्यादभिक्रामंजुहोतीतिप्रकृत्वाभिमुख्यात्वादीनांभावानतिकर्त्तव्यतात्वे
नैवविधानमनुष्ठानंचेत्यर्थः। यथाव्देनेति। निष्ठनेरेवगतिरित्यर्थमनुमोयसर्गेणैवद्योत्यतइत्यर्थः कथंतिष्ठतिर्गत्यर्थेनागम्यातऽनआह·
नहीति। अतोनप्रश्नाहूस्यगत्यर्थातातिभावः। नत्रचेति। यथास्थाणुप्रसास्पशास्थाणुर्दिवयाहानसंदेहानिवार्यः। तेः तथात्रापीत्यर्थः।
नत्वत्रेति। घटोनास्तीत्यत्रेत्यर्थः। स्वयमिति। स्वयमेवपुमांसंकेशेषुगृहीत्वाविकीर्षितस्यापाराग्निरूपणाहीत्यर्थः। प्रासंगिकादीति। पाश्व
कानांप्रयाजादीनांपुरोडाशेषुप्रसंगः त्रिषुचाग्नेयादिषुतंत्रमंगानिकृष्णलादिषुवाचघातादीनांवाधइत्यादिर्यथायं। लदव्यवहारः याचलो

केहारं हारमित्युक्ते ४ पर्याञ्ज एकाक्षापि कमानये सादौकः पिकरत्निपिमेदेन प्रपन्न। तत्रसर्वेमम सति पदार्थविभागे नपपन्नं स्यादित्यर्थः॥ अथास
तो भागा तपो ड्रतास वैवायं व्यवहारः सिध्यतीत्युच्यते तत्राह अपोद्धृतेति अमसद्यो ह्या रागाम्यमानं प्रसंगादिकार्यमप्यसादृश्यादितिभावः॥
क्रियार्थे नेति। क्रियावाचकेन पदेनेत्यर्थः यद्वा क्रियार्थे च न। अंशत्रयविशिष्ट भावनार्थेनेत्यर्थः॥ वाक्यार्थमिति। दाण्डगण्य प्रतिपादक
वाक्यस्वरूप सिध्यर्थमित्यर्थः॥ युक्तमेवोक्तमिति। पसरः शब्दः स शब्दार्थ इति तं त्रिकप्रसिद्धेरित्यर्थः॥ नत्विति। अत्र भाष्यकारेणाग्नेत्राणा
विपक्षे त्वाराणमित्यादिना वाक्यग्रहणमन्तरमुक्तं तन्नयुक्तं वाक्यस्यतत्र ग्रहणादर्शनात्। तस्मात्सदार्थग्रहणादेव वाक्यार्थग्रहणं तादृग्र
हणाद्व वाक्यार्थग्रहणमित्येवोत्तरं वक्तव्यमित्यर्थः॥ अथवा मानसादपराधादित्यादिना ग्रंथेन वाक्यग्रहणमुत्तरमुक्तं तन्नयुक्तं। तत्र वाक्य
स्य ग्रहणात्सं विहिताधरइत्यर्थः॥ पशुपतइति। त्वेनं कंचित्सदार्थमव्यक्तं। अगवाश्वादिरूपं दूरादुपलभमानस्यतस्मिन्नेव प्रदेशे हेषया
खुरशब्देन चाश्वजातिंगतिं चानुमिमानस्य तत्र चैवश्वेतगुणाम भावमवगच्छत। गुणजातिक्रियाणां यौ तत्रान्वयमपेक्षमाणानां योग्यता
म यौ पसाश्वे तोश्वो धावतीति परस्परसंसर्गो वगतिदृष्ट इत्यर्थः॥ कथं तेनेति। पौरुषेयवचनेनेत्यर्थः॥ कृतेग्रंथ इति कचित्तन्न हि तत्प्रसंगस्य
तेनप्रोक्तमित्यस्मिन्नर्थे वर्णनं नतु इत्युक्तं तन्न। पूर्वपक्ष एतदुपन्यासस्य सिद्धान्तोपयोगिकस्यानोचितसाद्धिस। यत्र्वव सूत्रकारेणानित्य संयोग
परिहारार्थमुक्तं परं तु श्रुति सामान्यमिति तत्रमाख्यायामपि षाकं वक्तुं न्यताप्रतिष्ठितवेयमित्याह। क्रतीति। कठशाखीयाः पुरुषाः परंपराधी

स

टि०प० यमानाशाखाकठशाद्दनाभिधीयतइत्यत्राविष्कृतिसामासमि सर्थः। तन्वर्थः समानइति। अस्यत्रप्रवाहणस्यापरेसमाहार्यपाठः। अत्रनुयः
१८ प्रकर्षेणप्रापयतिवायुः सप्रावाहणिरूप्रत्ययइत्यर्थः। भिदः। सत्रस्थकृतेपदस्याख्यानंकर्माणीति। ज्योतिष्टोमइति। ननुसत्रवाक्यानुपपा
त्तौपरिहृतेव्याख्यायांज्योतिष्टोमवाक्यव्याख्यानंनयुक्तंनैषदोषः। यथेदंसंवद्धार्थंतथातदपिवाक्यंभविष्यतीत्यभिप्रायेणतदुपन्यासात्। वस्य
17 ति। चेति। अभ्यासानुपपत्तिः प्रयोगेहि द्विरोधः स्याच्छद्वार्थेस्वप्रयोगम् तत्तस्मादुपपद्येतेत्यर्थवादचरणेसूत्रकारेवस्पष्टीसर्थः। जिज्ञा
सेति। अतोनत्रिपाद्याष्टोदनासत्रेशेषतयासंगतिःकिंतुजिज्ञासासत्रशेषतयेतिभावः॥ ॥ इतिश्रीमाधवात्मजरामकृष्णभट्टकृते॥
ष सिद्धांतचंद्रिकाख्यार्थविवरणेप्रथमस्याध्यायस्यप्रथमः पादः॥ ॥ जयश्रीराम॥ ॥ छ॥ ॥ श्रीराम॥ २॥ छ

रा०
१७

मीमांसासिद्धान्तचंद्रिका

5 ३५५०

श्लोक ३५०

